# sadAshivendrastutiH

# सदाशिवेन्द्रस्तुतिः

## Document Information

Text title : sadAshivendrastutiH

File name : sadAshivendrastutiH.itx

Category : shiva, nRisiMhabhAratIsvAmi

Location : doc_shiva

Author : nRisiMhabhAratIsvAmibhirvirachitA

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : January 19, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# सदाशिवेन्द्रस्तुतिः

श्रीगणेशाय नमः ।
परतत्त्वलीनमनसे प्रणमद्भवबन्धमोचनायाशु ।
प्रकटितपरतत्त्वाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १॥

परमशिवेन्द्रकराम्बुजसम्भूताय प्रणम्रवरदाय ।
पदधूतपङ्कजाय प्रणतिं० ॥ २॥

विजननदीकुञ्जगृहे मञ्जुलपुलिनैकमञ्जुतरतल्पे ।
शयनं कुर्वाणाय प्रणतिं- ॥ ३॥

कामाहिद्विजपतये शमदममुखदिव्यरत्नवारिधये ।
शमनाय मोहवितते: प्रणतिं० ॥ ४॥

नमदात्मबोधदात्रे रमते परमात्मतत्त्वसौधाग्रे ।
समबुद्धयेऽश्महेम्नोः प्रणतिं० ॥ ५॥

गिलिताविद्याहालाहलहतपुर्यष्टकाय बोधेन ।
मोहान्धकाररवये प्रणतिं० ॥ ६॥

शममुखषट्कमुमुक्षाविवेकवैराग्यदाननिरताय ।
तरसा नतजनततये प्रणतिं० ॥ ७॥

सिद्धान्तकल्पवल्लीमुखकृतिकर्त्रे कपालिभक्तिकृते ।
करतलमुक्तिफलाय प्रणतिं० ॥ ८॥

तृणपङ्कलिप्तवपुषे तृणतोऽप्यधरं जगद्विलोकयते ।
वनमध्यविहरणाय प्रणतिं० ॥ ९॥

निगृहीतहृदयहरये प्रगृहीतात्मस्वरूपरत्नाय ।
प्रणताब्धिपूर्णशशिने प्रणतिं० ॥ १०॥

अज्ञानतिमिररवये प्रज्ञानाम्भोधिपूर्णचन्द्राय ।

प्रणताघविपिनशुचये प्रणतिं० ॥ ११ ॥

मतिमलमोचनदक्षप्रत्यग्ब्रह्मैक्यदाननिरताय ।
स्मृतिमात्रतुष्टमनसे प्रणतिं० ॥ १२ ॥

निजगुरुपरम शिवेन्द्रश्लाघितविज्ञानकाष्ठाय ।
निजतत्त्वनिश्चलहृदे प्रणतिं० ॥ १३ ॥

प्रविलाप्य जगदशेषं परिशिष्टखण्डवस्तुनिरताय ।
आस्यप्राप्तान्नभुजे प्रणतिं० ॥ १४ ॥

उपधानीकृतबाहुः परिरब्धविरक्तिरामो यः ।
वसनीकृतखायास्मै प्रणतिं० ॥ १५ ॥

सकलागमान्तसारप्रकटनदक्षाय नम्रपक्षाय ।
सच्चित्सुखरूपाय प्रणतिम् ॥ ३६ ॥

द्राक्षाशिक्षणचतुरव्याहाराय प्रभूतकरुणाय ।
वीक्षापावितजगते प्रणतिं० ॥ १७ ॥

योऽनुत्पन्नविकारो बाहौ म्लेच्छेन छिन्नपतितेऽपि ।
अविदितममतायास्मै प्रणतिं० ॥ १८ ॥

न्यपतन्सुमानि मूर्धनि येनोच्चरितेषु नामसूग्रस्य ।
तस्मै सिद्धवराय प्रणतिं० ॥ १९ ॥

यः पापिनोऽपि लोकान् तरसा प्रकरोति पुण्यनिष्ठाग्र्यान् ।
करुणाम्बुराशयेऽस्मै प्रणतिं० ॥ २० ॥

सिद्धेश्वराय बुद्धेः शुद्धिप्रदपादपद्मनमनाय ।
बद्धा प्रमोचकाय प्रणतिं० ॥ २१ ॥

हृद्याय लोकविततेः पद्यावलिदाय जन्ममूकेभ्यः ।
प्रणतेभ्यः पदयुगले प्रणतिं० ॥ २२ ॥

जिह्वोपस्थरतानप्याह्वोच्चारेण जातु नैजस्य ।
कुर्वाणाय विरक्तान्प्रणतिं० ॥ २३ ॥

कमनीयकवनकर्त्रे शमनीयभयापहारचतुराय ।
तपनीयसदृशवपुषे प्रणतिं० ॥ २४ ॥

तारकविद्यादात्रे तारकपतिगर्ववारकास्याय ।
तारजपप्रवणाय प्रणतिं० ॥ २५॥

मूकोऽपि यत्कृपा चेल्लोकोत्तरकीर्तिराशु जायेत ।
अद्भुतचरितायास्मै प्रणतिं० ॥ २६॥

दुर्जनदूरायतरां सज्जनसुलभाय हस्तपात्राय ।
तरुतलकेतिनाय प्रणतिं० ॥ २७॥

भवसिन्धुधारयित्रे भवभक्ताय प्रणम्रवश्याय ।
भवबन्धविरहिताय प्रणतिं० ॥ २८॥

त्रिविधस्यापि त्यागं वपुषः कर्तुं स्थलत्रये य इव ।
अकरोत्समाधिमस्मै प्रणतिं० ॥ २९॥

कामिनमपि जितहृदयं क्रूरं शान्तं जडं सुधियम् ।
कुरुते यत्करुणाऽस्मै प्रणतिं० ॥ ३०॥

वेदस्मृतिस्थविद्वल्लक्षणलक्ष्येषु सन्दिहानानाम् ।
निश्चयकृते विहर्त्रे प्रणतिं० ॥ ३१॥

बालारुणनिभवपुषे लीलानिर्धूतकामगर्वाय ।
लोलाय चितिपरस्यां प्रणतिं० ॥ ३२॥

शरणीकृताब सुगुणैणीकृतरक्तपङ्कजाताय ।
धरणीसदृक्क्षमाय प्रणतिं० ॥ ३३॥

प्रणताय यतिवरेण्यैर्गणनाथेनाप्यसाध्यविघ्नहृते ।
गुणदासीकृतजगते प्रणतिं० ॥ ३४॥

सहमानाय सहस्राण्यप्यपराधान्प्रणम्रजनरचितान् ।
सहसैव मोक्षदात्रे प्रणतिं० ॥ ३५॥

धृतदेहाय नतावलितूणप्रज्ञाप्रदानवाञ्छातः ।
श्रदिक्षिणवक्राय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३६॥

तापत्रयार्तहृदयस्तापत्रयहारदक्षनमनमहम् ।
गुरुवरबोधितमहिमन् शरणं यास्ये तवाङ्घ्रिकमलयुगम् ॥ ३७॥

सदाऽऽत्मनि विलीनहृत्सकलवेदशास्त्रार्थवित्
सरित्तटविहारकृत् सकललोकहृतापहृत् ।

सदाशिवपदाम्बुजप्रणतलोकलभ्य ग्रभो
सदाशिवयतीट् सदा मयि कृपामपारां कुरु ॥ ३८॥

पुरा यवनकर्तनस्त्रवदमन्दरक्तोऽपि यः
पुनः पदसरोरुहप्रणतमेनमेनोविधिम् ।
कृपापरवशः पदं पतनवर्जितं प्राप यत्-
सदाशिवयतीट् स मय्यनवधिं कृपां सिञ्चतु ॥ ३९॥

हृषीकहृतचेतसि प्रहृतदेहके रोगकै-
रनेकवृजिनालये शमदमादिदिग्गन्धोज्झिते ।
तवाङ्घ्रिपतिते यतौ यतिपते महायोगिराट्
सदाशिव कृपां मयि प्रकुरु हेतुशून्यां द्रुतम् ॥ ४०॥

न चाहमतिचातुरीरचितशब्दसङ्घैः स्तुतिं
विधातुमपि च क्षमो न च जपादिकेऽप्यस्ति मे ।
बलं बलवतां वर प्रकुरु हेतुशून्यां विभो
सदाशिव कृपां मयि प्रवर योगिनां सत्वरम् ॥ ४१॥

शब्दार्थविज्ञानयुता हि लोके वसन्ति लोका बहवः प्रकामम् ।
निष्ठायुता न श्रुतदृष्टपूर्वा विना भवन्तं यतिराज नूनम् ॥ ४२॥

स्तोकार्चनप्रीतहृदम्बुजाय पादाब्जचूडापररूपधर्त्रे ।
शोकापहर्त्रे तरसा नतानां पाकाय पुण्यस्य नमो यतीश ॥ ४३॥

नाहं हृषीकाणि विजेतुमीशो नाहं सपर्याभजनादि कर्तुम् ।
निसर्गया त्वं दययैव पाहि सदाशिवेमं करुणापयोधे ॥ ४४॥

कृतयाऽनयानतावलिकोटिगतेनातिमन्दबोधेन ।
मुदमेहि नित्यतृप्तप्रवर स्तुत्या सदाशिवायाशु ॥ ४५॥

इति श्रीजगद्गुरुशृङ्गगिरिश्रीसच्चिदानन्दशिवाभिनव-
नृसिंहभारतीस्वामिभिर्विरचिता सदाशिवमहेन्द्रस्तुतिः समाप्ता ॥

Proofread by PSA Easwaran

*sadAshivendrastutiH*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*